# ॥ महाकैलासनाथ ध्यानम् ॥

अथाकिञ्चित्करो रामो जानुभ्यामवनिं गतः ।

मीलिताक्षो भयाविष्टः शङ्करं शरणं गतः ॥

स्वरेणाप्युच्चरन्नुच्चैः शम्भोर्नामसहस्रकम् ।

शिवं च दण्डवद्भूमौ प्रणनाम पुनः पुनः ॥

पुनश्च पूर्ववच्चासीच्छब्दो दिङ्मण्डलं स्वनन् ।

चचाल वसुधा घोरं पर्वताश्च चकम्पिरे ॥

अथ क्षणेन शीतांशुशीतलं तेज आदधत् ।

उन्मीलिताक्षो रामस्तु यावद्यावत्प्रपश्यति ॥

वृषभ ध्यानम्

तावद्ददर्श वृषभं सर्वालङ्कारसंयुतम् ।

पीयूषमथनोद्भूतनवनीतस्य पिण्डवत् ॥

प्रोतस्वर्णं मरकतच्छायाशृङ्गद्वयाञ्चितम् ।

नीलरत्नेक्षणं ह्रस्वकण्ठकम्बलभूषितम् ॥

रत्नपल्याणसंयुक्तं निबद्धश्वेतचामरैः ।

घण्टिकाघर्घरीशब्दैः पूरयन्तं दिशो दश ॥

## महाकैलासनाथ ध्यानम्

तत्रासीनं महादेवं शुद्धस्फटिकविग्रहम् ।

कोटिसूर्यप्रतीकाशं कोटिशीतांशुशीतलम् ॥

व्याघ्रचर्माम्बरधरं नागयज्ञोपवीतिनम् ।

सर्वालङ्कारसंयुक्तं विद्युत्पिङ्गजटाधरम् ॥

नीलकण्ठं व्याघ्रचर्मोत्तरीयं चन्द्रशेखरम् ॥

नानाविधायुधोद्भासि-दशबाहुं त्रिलोचनम् ।

युवानं पुरुषश्रेष्ठं सच्चिदानन्दविग्रहम् ॥

## जगदम्बिका ध्यानम्

तत्रैव च सुखासीनां पूर्णचन्द्रनिभाननाम् ।

नीलेन्दीवरदामाभामुद्यन्मरकतप्रभाम् ॥

मुक्ताभरणसंयुक्तां रात्रिं ताराञ्चितामिव ।

विन्ध्यक्षितिधरोत्तुङ्गकुचभारभरालसाम् ॥

सदसत्संशयाविष्टमध्यदेशान्तरां वराम् ।

दिव्याभरणसंयुक्तां दिव्यगन्धानुलेपनाम् ॥

दिव्यमाल्याम्बरधरां नीलेन्दीवरलोचनाम् ।

अलकोद्भासिवदनां ताम्बूलग्रासशोभिताम् ॥

शिवालिङ्गनसंजातपुलकोद्भासिविग्रहाम् ।

सच्चिदानन्दरूपाढ्यां जगन्मातरमम्बिकाम् ।

सौन्दर्यसारसन्दोहां ददर्श रघुनन्दनः ॥

परिचारक ध्यानम्

स्वस्ववाहनसम्बद्धान्नानायुधलसत्करान् ।

बृहद्रथन्तरादीनि सामानि परिगायतः ।

स्वस्वकान्तासमायुक्तान् दिक्पालान् परितः स्थितान् ॥

नारायण ध्यानम्

अग्रगं गरुडारूढं शङ्खचक्रगदाधरम् ।

कालाम्बुदप्रतीकाशं विद्युत्कान्तिश्रिया युतम् ।

जपन्तमेकमनसा रुद्राध्यायं जनार्दनम् ॥

चतुर्मुख ध्यानम्

पश्चाच्चतुर्मुखं देवं ब्रह्माणं हंसवाहनम् ।

चतुर्वक्त्रैश्चतुर्वेदरुद्रसूक्तैर्महेश्वरम् ।

स्तुवनतं भारतीयुक्तं दीर्घकूर्चं जटाधरम् ॥

परिवार ध्यानम्

अथर्वशिरसा देवं स्तुवन्तं मुनिमण्डलम् ।

गङ्गादितटिनीयुक्तमम्बुधिं नीलविग्रहम् ॥

श्वेताश्वतरमन्त्रेण स्तुवन्तं गिरिजापतिम् ।

अनन्तादिमहानागान् कैलासगिरिसन्निभान् ॥

कैवल्योपनिषत्पाठान्मणिरत्नविभूषितान् ।

सुवर्णवेत्रहस्ताढ्यं नन्दिनं पुरतः स्थितम् ॥

दक्षिणे मूषकारूढं गणेशं पर्वतोपमम् ।

मयूरवहनारूढमुत्तरे षण्मुखं तथा ॥

महाकालं च चण्डेशं पार्श्वयोर्भीषणाकृतिम् ।

कालाग्निरुद्रं दूरस्थं ज्वलद्दावाग्निसन्निभम् ॥

त्रिपादं कुटिलाकारं नटभृङ्गिरिटिं पुरः ।

नानाविकारवदनान् कोटिशः प्रमथाधिपान् ॥

नानावाहनसंयुक्तं परितो मातृमण्डलम् ।

पञ्चाक्षरीजपासक्तान् सिद्धविद्याधरादिकान् ॥

दिव्यरुद्रकगीतानि गायन् किन्नरबृन्दकम् ।

तत्र त्रैयम्बकं मन्त्रं जपद्द्विजकदम्बकम् ॥

गायन्तं वीणया गीतं नृत्यन्तं नारदं दिवि ।

नृत्यतो नाट्यनृत्येन रम्भादीनप्सरोगणान् ॥

गायच्चित्ररथादीनां गन्धर्वाणां कदम्बकम् ।

कम्बलाश्वतरौ शम्भुकर्णकुण्डलतां गतौ ॥

गायन्तौ पन्नगौ गीतं कपालं कम्बलं तथा ।

एवं देवसभां दृष्ट्वा कृतार्थो रघुनन्दनः ॥

हर्षगद्गदया वाचा स्तुवन्देवं महेश्वरम् ।

दिव्यनामसहस्रेण प्रणनाम पुनः पुनः ॥

स्तोत्रम्

देव प्रपन्नार्तिहर प्रसीद

प्रसीद विश्वेश्वर विश्ववन्द्य ।

प्रसीद गङ्गाधर चद्रमौळे

मां त्राहि संसारभयादनाथम् ॥

त्वत्तो हि जातं ज्गदेतदीश

त्वय्येव भूतानि वसन्ति नित्यम् ।

त्वय्येव शम्भो विलयं प्रयान्ति

भूमौ यथा वृक्षलतादयोऽपि ॥

ब्रह्मेन्द्ररुद्राश्च मरुद्गणाश्च

गन्धर्वयक्षासुरसिद्धसङ्घाः ।

गङ्गादिनद्यो वरुणालयाश्च

वसन्ति शूलिंस्तव वक्त्रमन्ति ॥

त्वन्मायया कल्पितमिन्दुमौळे

त्वय्येव दृश्यत्वमुपैति विश्वम् ।

भ्रान्त्या जनः पश्यति सर्वमेत-

च्छुक्तौ यथा रूप्यमहिं च रज्जौ ॥

तेजोभिरापूर्य जगत्समग्रं

प्रकाशमानः कुरुषे प्रकाशम् ।

विनाप्रकाशं तव देवदेव

न दृश्यते विश्वमिदं क्षणेन ॥

अल्पाश्रयो नैव बृहन्तमर्थं

धत्तेऽणुरेको नहि विन्ध्यशैलम् ।

तद्वक्त्रमात्रे जगदेतदस्ति

त्वन्माययैवेति च निश्चिनोमि ॥

रज्जौ भुजङ्गो भयदो यथैव

न जायते नास्ति न चैति नाशम् ।

त्वन्मायया केवलमात्तरूपं

तथैव विश्वं त्वयि नीलज्कण्ठ ॥

विचार्यमाणो तव यच्छरीर-

माधारभावं जगतामुपैति ।

तदप्यवश्यं मदविद्ययैव

पूर्णश्चिदानन्दमयो यतस्त्वम् ॥

पूजेष्टपूर्तादि वरक्रियाणां

भोक्तुः फलं यच्छसि शस्तमेव ।

मृषैतदेवं वचनं पुरारे

त्वत्तोऽस्थि भिन्नं नच किञ्चिदेव ॥

अज्ञानमूढा मुनयो वदन्ति

पूजोपचारादि बहिः क्रियाभिः ।

तोषं गिरीशो भजतीति मिथ्या

कुतस्त्वमूर्तस्य तु भोगलिप्सा ॥

किञ्चिद्दलं वा चुलोकोदकं वा

यत्त्वं महेश प्रतिगृह्य दत्से ।

त्रैलोक्यलक्ष्मीमपि तज्जनेभ्यः

सर्वं त्वविद्याकृतमेव मन्ये ॥

व्याप्नोषि सर्वा विदिशो दिशश्च

त्वं विश्वमेकः पुरुषः पुराणः ।

नष्टेऽपि तस्मिंस्तव नास्ति हानि-

र्घटे विनष्टे नभसो यथैव ॥

यथैकमाकाशगमर्कबिम्बं

क्षुद्रेषु पात्रेषु जलान्वितेषु।

भजत्यनेकप्रतिबिम्बभावं

तथा त्वमन्तःकरणेषु देव॥

सुसर्जने वाप्यवने विनाशे

विश्वस्य किञ्चित्तव नास्ति कार्यम्।

अनादिभिर्देहभृतामदृष्टै-

स्तथापि तत्स्वप्नवदातनोषि॥

स्थूलस्य सूक्ष्मस्य जडस्य देह-

द्वयस्य शम्भो न चिदं विनास्ति।

अतस्त्वदारोपणमातनोति

श्रुतिः पुरारे सुखदुःखयोः सदा॥

नमः सच्चिदम्भोधिहंसाय तुभ्यं

नमः कालकण्ठाय कालात्मकाय।

नमस्ते समस्ताघसंहरकर्त्रे

नमस्ते मृषाचित्तवृत्त्यैकभोक्त्रे॥

एवं प्रणम्य विश्वेशं पुरतः प्राञ्जलिः स्थितः।

विस्मितः परमेशानं जगदे रघुनन्दनः॥

महादेव उवाच

मृतिबीजं भवेज्जन्म जन्मबीजं भवेन्मृतिः।

घटयन्त्रवदश्रान्तो बंभ्रमीत्यनिशं नरः॥

गर्भे पुंसः शुक्रपाताद्यदुक्तं मरणावधि।

तदेतस्य महाव्याधेर्मत्तो नान्योऽस्ति भेषजम्॥

O rAghava, this great disease named samsAra that involves the cycle of birth and death has only one cure and that is Me, states mahAdeva.

## || mahākailāsanātha dhyānam ||

athākiñcitkaro rāmo jānubhyāmavaniṁ gataḥ |

mīlitākṣo bhayāviṣṭaḥ śaṅkaraṁ śaraṇaṁ gataḥ ||

svareṇāpyuccaranuccaiḥ śambhornāmasahasrakam |

śivaṁ ca daṇḍavadbhūmau praṇanāma punaḥ punaḥ ||

punaśca pūrvavaccāsīcchabdo diṅmaṇḍalaṁ svanan |

cacāla vasudhā ghoraṁ parvatāśca cakampire ||

atha kṣaṇena śītāṁśuśītalaṁ teja ādadhat |

unmīlitākṣo rāmastu yāvadyāvatprapaśyati ||

vṛṣabha dhyānam

tāvaddadarśa vṛṣabhaṁ sarvālaṅkārasaṁyutam |

pīyūṣamathanodbhūtanavanītasya piṇḍavat ||

protasvarṇaṁ marakatacchāyāśṛṅgadvayāñcitam |

nīlaratnekṣaṇaṁ hrasvakaṇṭhakambalabhūṣitam ||

ratnapalyāṇasaṁyuktaṁ nibaddhaśvetacāmaraiḥ |

ghaṇṭikāghargharīśabdaiḥ pūrayantaṁ diśo daśa ||

mahākailāsanātha dhyānam

tatrāsīnaṁ mahādevaṁ śuddhasphaṭikavigraham |

koṭisūryapratīkāśaṁ koṭiśītāṁśuśītalam ||

vyāghracarmāmbaradharaṁ nāgayajñopavītinam |

sarvālaṅkārasaṁyuktaṁ vidyutpiṅgajaṭādharam ||

nīlakaṇṭhaṁ vyāghracarmottarīyaṁ candraśekharam ||

nānāvidhāyudhodbhāsi-daśabāhuṁ trilocanam |

yuvānaṁ puruṣaśreṣṭhaṁ saccidānandavigraham ||

jagadambikā dhyānam

tatraiva ca sukhāsīnāṁ pūrṇacandranibhānanām |

nīlendīvaradāmābhāmudyanmarakataprabhām ||

muktābharaṇasaṁyuktāṁ rātriṁ tārāñcitāmiva |

vindhyakṣitidharottuṅgakucabhārabharālasām ||

sadasatsaṁśayāviṣṭamadhyadeśāntarāṁ varām |

divyābharaṇasaṁyuktāṁ divyagandhānulepanām ||

divyamālyāmbaradharāṁ nīlendīvaralocanām |

alakodbhāsivadanāṁ tāmbūlagrāsaśobhitām ||

śivāliṅganasañjātapulakodbhāsivigrahām |

saccidānandarūpāḍhyāṁ jaganmātaramambikām |

saundaryasārasandohāṁ dadarśa raghunandanaḥ ||

paricāraka dhyānam

svasvavāhanasambaddhānnānāyudhalasatkarān |

bṛhadrathantarādīni sāmāni parigāyataḥ |

svasvakāntāsamāyuktān dikpālān paritaḥ sthitān ||

nārāyaṇa dhyānam

agragaṁ garuḍārūḍhaṁ śaṅkhacakragadādharam |

kālāmbudapratīkāśaṁ vidyutkāntiśriyā yutam |

japantamekamanasā rudrādhyāyaṁ janārdanam ||

caturmukha dhyānam

paścāccaturmukhaṁ devaṁ brahmāṇaṁ haṁsavāhanam |

caturvaktraiścaturvedarudrasūktairmaheśvaram |

stuvanataṁ bhāratīyuktaṁ dīrghakūrcaṁ jaṭādharam ||

parivāra dhyānam

atharvaśirasā devaṁ stuvantaṁ munimaṇḍalam |

gaṅgāditaṭinīyuktamambudhiṁ nīlavigraham ||

śvetāśvataramantreṇa stuvantaṁ girijāpatim |

anantādimahānāgān kailāsagirisannbhān ||

kaivalyopaniṣatpāṭhānmaṇiratnavibhūṣitān |

suvarṇavetrahastāḍhyaṁ nandinaṁ purataḥ sthitam ||

dakṣiṇe mūṣakārūḍhaṁ gaṇeśaṁ parvatopamam |

mayūravahanārūḍhamuttare ṣaṇmukhaṁ tathā ||

mahākālaṁ ca caṇḍeśaṁ pārśavyorbhīṣaṇākṛtim |

kālāgnirudraṁ dūrasthaṁ jvaladdāvāgnisannibham ||

tripādaṁ kuṭilākāraṁ naṭabhṛṅgiriṭiṁ puraḥ |

nānāvikāravadanān koṭiśaḥ pramathādhipān ||

nānāvāhanasaṁyuktaṁ parito mātṛmaṇḍalam |

pañcākṣarījapāsaktān siddhavidyādharādikān ||

divyarudrakagītāni gāyan kinnarabṛndakam |

tatra traiyambakaṁ mantraṁ japaddvijakadambakam ||

gāyantaṁ vīṇayā gītaṁ nṛtyantaṁ nāradaṁ divi |

nṛtyato nāṭyanṛtyena rambhādīnapsarogaṇān ||

gāyaccitrarathādīnāṁ gandharvāṇāṁ kadambakam |

kambalāśvatarau śambhukarṇakuṇḍalatāṁ gatau ||

gāyantau pannagau gītaṁ kapālaṁ kambalaṁ tathā |

evaṁ devasabhāṁ dṛṣṭvā kṛtārtho raghunandanaḥ ||

harṣagadgadayā vācā stuvandevaṁ maheśvaram |

divyanāmasahasreṇa praṇanāma punaḥ punaḥ ||

stotram

deva prapannārtihara prasīda

prasīda viśveśvara viśvavandya |

prasīda gaṅgādhara cadramauḻe

māṁ trāhi saṁsārabhayādanātham ||

tvatto hi jātaṁ jgadetadīśa

tvayyeva bhūtāni vasanti nityam |

tvayyeva śambho vilayaṁ prayānti

bhūmau yathā vṛkṣalatādayo'pi ||

brahmendrarudrāśca marudgaṇāśca

gandharvayakṣāsurasiddhasaṅghāḥ |

gaṅgādinadyo varuṇālayāśca

vasanti śūliṁstava vaktramanti ||

tvanmāyayā kalpitamindumauḻe

tvayyeva dṛśyatvamupaiti viśvam |

bhrāntyā janaḥ paśyati sarvameta-

cchuktau yathā rūpyamahiṁ ca rajjau ||

tejobhirāpūrya jagatsamagraṁ

prakāśamānaḥ kuruṣe prakāśam |

vināprakāśaṁ tava devadeva

na dṛśyate viśvamidaṁ kṣaṇena ||

alpāśrayo naiva bṛhantamarthaṁ

dhatte'ṇureko nahi vindhyaśailam |

tadvaktramātre jagadetadasti

tvanmāyayaiveti ca niścinomi ||

rajjau bhujaṅgo bhayado yathaiva

na jāyate nāsti na caiti nāśam |

tvanmāyayā kevalamāttarūpaṁ

tathaiva viśvaṁ tvayi nīlajkaṇṭha ||

vicāryamāṇo tava yaccharīra-

mādhārabhāvaṁ jagatāmupaiti |

tadapyavaśyaṁ madavidyayaiva

pūrṇaścidānandamayo yatastvam ||

pūjeṣṭapūrtādi varakriyāṇāṁ

bhoktuḥ phalaṁ yacchasi śastameva |

mṛṣaitadevaṁ vacanaṁ purāre

tvatto'sthi bhinnaṁ naca kiñcideva ||

ajñānamūḍhā munayo vadanti

pūjopacārādi bahiḥ kriyābhiḥ |

toṣaṁ girīśo bhajatīti mithyā

kutastvamūrtasya tu bhogalipsā ||

kiñciddalaṁ vā culokodakaṁ vā

yattvaṁ maheśa pratigṛhya datse |

trailokyalakṣmīmapi tajjanebhyaḥ

sarvaṁ tvavidyākṛtameva manye ||

vyāpnoṣi sarvā vidiśo diśaśca

tvaṁ viśvamekaḥ puruṣaḥ purāṇaḥ |

naṣṭe'pi tasmiṁstava nāsti hāni-

rghaṭe vinaṣṭe nabhaso yathaiva ||

yathaikamākāśagamarkabimbaṁ

kṣudreṣu pātreṣu jalānviteṣu |

bhajatyanekapratibimbabhāvaṁ

tathā tvamantaḥkaraṇeṣu deva ||

susarjane vāpyavane vināśe

viśvasya kiñcittava nāsti kāryam |

anādibhirdehabhṛtāmadṛṣṭai-

stathāpi tatsvapnavadātanoṣi ||

sthūlasya sūkṣmasya jaḍasya deha-

dvayasya śambho na cidaṁ vināsti |

atastvadāropaṇamātanoti

śrutiḥ purāre sukhaduḥkhayoḥ sadā ||

namaḥ saccidambhodhihaṁsāya tubhyaṁ

namaḥ kālakaṇṭhāya kālātmakāya |

namaste samastāghasaṁharakartre

namaste mṛṣācittavṛttyaikabhoktre ||

evaṁ praṇamya viśveśaṁ purataḥ prāñjaliḥ sthitaḥ |

vismitaḥ parameśānaṁ jagade raghunandanaḥ ||

mahādeva uvāca

mṛtibījaṁ bhavejjanma janmabījaṁ bhavenmṛtiḥ |

ghaṭayantravadaśrānto bambhramītyaniśaṁ naraḥ ||

garbhe puṁsaḥ śukrapātādyaduktaṁ maraṇāvadhi |

tadetasya mahāvyādhermatto nānyo'sti bheṣajam ||

O rAghava, this great disease named samsAra that involves the cycle of birth and death has only one cure and that is Me, states mahAdeva.

॥ इति शिवम् ॥

www.kamakotimandali.com